International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2025; 11(5): 178-182
© 2025 IJSR
www.anantaajournal.com
Received: 19-08-2025
Accepted: 22-09-2025

**रेणू**
शोधार्थिनी, संस्कृत, पालि, प्राकृतविभागः, हि.प्र.के.वि. धर्मशाला, कांगडा, हिमाचल प्रदेश, भारत

**डॉ. ना.वैतिसुब्रह्मणियन**
सहायकाचार्यः, संस्कृत, पालि, प्राकृत, विभागः, हि.प्र.के.वि.धर्मशाला, कांगडा, हिमाचल प्रदेश, भारत

**Corresponding Author:**
**रेणू**
शोधार्थिनी, संस्कृत, पालि, प्राकृतविभागः, हि.प्र.के.वि. धर्मशाला, कांगडा, हिमाचल प्रदेश, भारत

# धर्मश्रीः इत्युपन्यासस्य प्रथमस्तबकस्य वाक्यविज्ञानदृशा अनुवादकशैल्याः विश्लेषणम्

**रेणू, ना.वैतिसुब्रह्मणियन**

**सारांश**
भाषा हि लोकस्य सर्वश्रेष्ठनिधिरस्ति। नह्येनां विना जनाः स्वकीयमाशयं प्रकाशयितुं प्रभवेयुः। कालपर्यायेण जीववत् भाषा अपि रूपं, शैलीं, प्रयोगं च परिवर्तयति। अनेन परिवर्तनेन एव तस्याः भाषायाः विकासः संभवति। एषा परिवर्तनप्रक्रिया संस्कृतभाषायाः ध्वनि-रूप-अर्थ-वाक्यरचना-शैलीत्यादिष्वपि स्पष्टं दृश्यते। अर्वाचीनसंस्कृतसाहित्ये वाक्यरचनायां प्राचीनकालात् भिन्नता दृश्यते। गद्यस्य नूतनविधासु परिगणिते धर्मश्रीः उपन्यासे वाक्यविज्ञानदृशा अनुवादकशैल्याः विश्लेषणम् अस्मिन् शोधपत्रे प्रस्तूयते। अत्र वाक्येषु लकारप्रयोगः, सन्धिनिर्देशः, पदविन्यासः, धातुविचारः कथमस्ति इति द्रष्टव्यः। अनुवादकः पाणिनीयव्याकरणपरम्परां भर्तृहरिवाक्यपदीयस्य सिद्धान्ताश्च अवलम्ब्य आधुनिकोपन्यासशैल्याः उपस्थापनं कृतवान्। स्थूलाक्षरेषु उपन्यासस्थवाक्यानां निर्देशः कृतः तथा च रेखाङ्कितेषु पदेषु भिन्नता प्रदर्श्यते।

**कुटशब्दः** संस्कृतभाषा, वाक्यविज्ञान, अनुवादकशैली, उपन्यास, व्याकरणपरम्परा, वाक्यरचना

## प्रस्तावना

### शब्दस्य महात्म्यम्

भाषा मानवस्य प्रगतौ विशेषसहायका वर्तते। शब्दाभावे मानवस्य का गतिः भवेत् इति आचार्यः दण्डी उवाच "इदमन्धतमः कृत्स्नं जायेत भुवनत्रयम्। यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते"॥[1] जगदिदं शब्दस्य प्रकाशेनैव प्रकाशमानं वर्तते। यदि शब्दरूपज्योतिः न भवेत् तर्हि जगदिदमन्धकारमयं स्यात्। शब्दाभावे लोकाः निजभावं प्रकाशयितुं न शक्नुयुः। वस्तुतः अस्माकं लोकयात्रा वाग्देव्याः कृपया एव सम्भवति "वाचमेव प्रसादेन लोकयात्रा प्रवर्तते"[2] यथा प्राणिनां कृते पृथ्वीजलतेजोगगनसमीराणां आवश्यकता सर्वैः स्वीक्रियते तथैव भाषावयवभूतानां शब्दानामपि आवश्यकता भवति।

### भाषाशब्दस्योत्पत्तिः

भाषा इत्यस्य शब्दस्य मूलं भाष् इति धातुः अस्ति। एषः धातुः व्यक्तायां वाचि इत्यर्थे धातुपाठे पठितः। अत्र घञ् प्रत्ययः स्त्रीत्वे प्रयुक्तः भवति। अतः भाषा सा साधनं येन मानवः निजवाक्यं वक्तुं समर्थः भवति। महाभाष्यानुसारं भाषा शब्देन वर्णात्मिका मानवभाषा गृहीता।[3] संसारे च यावन्तो वर्तमाना व्यवहारास्ते सर्वे भाषानुगामिनः एव इति प्रत्यक्षानुभवेन सिद्धम्।

### आधुनिकभाषाविज्ञानस्योत्पत्तिः

विश्वेऽस्मिन् बहवः भाषाः समुपलभ्यन्ते। कालेन एतासु भाषासु परिवर्तनं जायते एव। इदम् परिवर्तनमेव तस्याः भाषायाः परिवर्द्धनस्य कदाचित् ह्रासस्यापि कारणं भवति। एवं कालक्रमेण भाषायां जायमानात् परिवर्तनात् समुद्भूतं परिवर्द्धनम् एव भाषायाः विकासः इत्यभिधीयते। यद्यपि भाषा व्याकरणनियमैः परम्पराभिश्च बद्धा भवति, तथापि कालक्रमेण प्राचीनपरिष्कृतास्वपि भाषासु परिवर्तनमिदं तु भवत्येव। यतोहि भाषा स्वाभाविकरूपेण स्वतः प्रवाहशीला अस्ति। तत् परिवर्तनमेव भाषायाः विकासः ह्रासः वा कथ्यते। भाषायाः ह्रासविकासयोः अध्ययनमेव भाषाविज्ञानमिति कथ्यते। संस्कृतभाषायां वैदिकवाङ्मये बहूनि रूपाणि प्राप्यन्ते येषां प्रयोगः सम्प्रति लौकिके प्रयोगे प्रायेण नैव दृश्यते। इत्थं वैदिकलौकिकयोः संस्कृतयोः अध्ययनमपि भाषाविज्ञानं कारयति। भाषायाः विशिष्टं ज्ञानं भाषाविज्ञानमित्यभिधीयते। यथोक्तं कपिलदेवमहोदयेन –

**भाषाया यत्तु विज्ञानं, सर्वांगं व्याकृतात्मकम् विज्ञानदृष्टिमूलं तद्, भाषाविज्ञानमुच्यते।**

आधुनिकभाषाविज्ञानस्य प्रारम्भः यूरोपदेशात् अभवत् इति मन्यते। सर्वप्रथमं १७८६ तमे वर्षे सर विलियम जोन्स् महोदयः

भाषाविज्ञानम् अधिकृत्य चिन्तनम् आरब्धवान् । तदा शास्त्रमिदं 'फिलोलाजी' इत्यभिधीयते। नवदशशताब्द्यां विशेषतः तुलनात्मकाध्ययनप्रभावात् विशेषणत्वेन Comparative Philology नाम्ना अभिहितम्। अधुना "Linguistics" अथवा "Philology" एते द्वे पदे प्रयोगारूढे दृश्येते । एतदतिरिच्य हिन्दीभाषायां इदं शास्त्रं भाषातत्त्वं, भाषाशास्त्रं, भाषाविचारः, भाषालोचनं, तुलनात्मकभाषाविज्ञानं इत्येवं नामभिः संकीर्त्यते ।

**प्राचीनसंस्कृतवाङ्मये भाषासम्बद्धविचाराः**

यद्यपि स्वकीये वर्तमानस्वरूपे भाषाविज्ञानमेकं नूतनं विषयं मन्यते तथापि भाषायाः विषये मानवः आदिकालात् जिज्ञासुः आसीत् । विशेषतः भारतवर्षे भाषासंबन्धिविवेचनसूत्राणि अतिप्राचीनकालादेव समुपलभ्यन्ते । ऋग्वेदः भारतस्य उत विश्वस्य प्राचीनतमः ग्रन्थो वर्तते । संस्कृतभाषायां निबद्धे ग्रन्थे ऋग्वेदे भाषाविषयकं सूक्तद्वयमुपलभ्यते ।[4] संस्कृतभाषा विश्वस्य प्राचीनतमा, संरचनादृष्ट्या परिपूर्णा च अस्ति । भाषेयं न केवलं भारतीयसंस्कृतेः साहित्यस्य आधारो वर्तते अपितु भाषाविज्ञानक्षेत्रेऽपि विश्वे अद्वितीया वर्तते । अस्यां संस्कृतभाषायाम् प्रत्येकम् अङ्गानां सूक्ष्ममध्ययनं दरीदृश्यते । संस्कृतभाषाविज्ञानस्य इतिहासः अतीव प्राचीनः, समृद्धः, व्यवस्थितः चास्ति । अस्य भाषाविज्ञानस्य विकासपरम्परा न केवलं भारतीयभाषासु अपि तु विश्वस्मिन् अपि अन्येषु भाषाशास्त्रीयसिद्धान्तेषु गहनं प्रभावम् अजीजनत् ।

संस्कृतभाषाविज्ञानस्य प्रारम्भिकविकासः वैदिकयुगात् आरभते । वेदानां रचना प्रायः १५०० ईसापूर्वे अभवत् इति मन्यते । अयं कालः मौखिकपरम्परायाः युगः आसीत्, यत्र वेदानां मन्त्राणां त्रुटिरहितं स्मरणं, तेषां च शुद्धोच्चारणं अतीव आवश्यकं भवति स्म । वैदिकसंहितासु ध्वनिशास्त्रस्य, पदविन्यासस्य तथा स्वरविन्यासस्य सूक्ष्मविचारः दृश्यते । तत्र मन्त्राणामुच्चारणे यथासम्भवं शुद्धता अपेक्षिता यतः मन्त्रोच्चारणे स्वरभेदः अपूर्वफलदायकः भवति । "एकः शब्दः सम्यग् ज्ञातः सुप्रयुक्तः स्वर्गे लोके कामधुग्भवति" ।[5] इति एतदतिरिक्तं वेदस्य अन्येषु स्थलेषु भाषासम्बन्धिविवेचनं प्राप्यते ।

"चत्वारि वाक् परिमिता पदानि", तुरीयां वाचं मनुष्या वदन्ति[6]।
"देवीं वाचमजनयन्त देवास्तासां विश्वरूपा पशवो वदन्ति"।[7]
"उत त्वः पश्यन्न ददर्श वाचमुत त्वः शृण्वन् श्रणोत्येनाम्" ।[8]
"ये त्रिषप्ताः परियन्ति विश्वा" ।[9]

इत्यादीनि श्रुतिवाक्यानि अस्य प्रमाणभूतानि सन्ति इति स्पष्टमेव ।

यद्यपि प्राचीनकाले भाषाशास्त्रस्य औपचारिकं शास्त्रम् उपलब्धं नासीत्, तथापि वेदानां मन्त्राणां संरक्षणाय, उच्चारणस्य च शुद्धां पद्धतिं व्यस्थापयितुं रक्षितुं च प्रारम्भिकभाषाशास्त्रीयपरम्परा आसीत् । वेदानां ज्ञानाय सर्वप्रथमं षड्वेदाङ्गानामध्ययनम् आवश्यकमस्ति । यथोक्तम् महाभाष्ये –

**"ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च"** ।[10]

षट्त्सु वेदाङ्गेषु शिक्षाव्याकरणनिरुक्तछन्दांसि एतानि चत्वारः ग्रन्थाः वैदिकभाषायाः संरचनात्मकाङ्गानां विशदं विवेचनं कुर्वन्ति ।

शिक्षा - "स्वर-वर्णाद्युच्चारणप्रकारो यत्र शिक्ष्यते, उपदिश्यते सा शिक्षा"।[11] पाणिनीयशिक्षानुसारं "मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्या प्रयुक्तो न तमर्थमाह । स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोपराधात् ।।[12] जर्मनविद्वान् डॉ.विण्टरनिट्जानुसारं वैदिकमन्त्राणां संहितापाठः पदपाठश्च शिक्षाख्यावेदाङ्गस्य नियमानुसारमभवत् ।

**संहितापाठः**

अग्निः पूर्वेभिऋषिभिरीड्यो नूतनैरुत । स देवां एह वक्षति।।[13]

**अस्य मन्त्रस्य पदपाठः अधो निर्दिश्यते**

अग्निः। पूर्वेभिः । ऋषिऽभिः। ईड्यः।नूतनैः। उत । सः। देवान् ।आ । इह ।वक्षति ।।[14]

तैत्तिरीयोपनिषदः शिक्षावल्ल्यां शिक्षाशास्त्रस्य प्रयोजनमुल्लिखितमस्ति "अथ शिक्षां व्याख्यास्यामः, वर्णः, स्वरः, मात्रा, बलम्, साम, सन्तान इत्युक्तः शिक्षाध्यायः" ।

**निरुक्तम्**

निरुक्तं निरूपयन् सायणाचार्यः ऋग्वेदभाष्यभूमिकामाह "अर्थावबोधे निरपेक्षतया पदजातं यत्रोक्तं तन्निरुक्तम्"। यद्यपि यास्कात्पूर्वमपि द्वादश निरुक्तकाराः आसन्, येषामुल्लेखः तेन निरुक्ते कृतः। परन्तु उपलब्धप्रौढतमा कृतिः यास्ककृतनिरुक्तमेव अस्ति, यः भारतीयभाषाशास्त्रस्य मेरुदण्डः इव वर्तते । शब्दो नित्यः, पदचतुष्टयं, सर्वाणि नामानि आख्यातजानि, कानिचिदेव आख्यातजानि वा इत्यादीनि भाषाविषयिकी व्यापकदृष्टिः आचार्येण यास्केन उपस्थापिता । अपि च निरुक्तकारेण यास्काचार्येण ध्वनिविकारस्य पञ्च हेतवः प्रतिपादिताः सन्ति । "वर्णागमो वर्णविपर्ययश्च द्वौ चापरौ वर्णविकारनाशौ। धातोस्तदर्थातिशयेन योगस्तदुच्यते पञ्चविधं निरुक्तम्"। एवं निरुक्तं आधुनिकभाषाविज्ञानस्य प्राचीनं रूपमस्ति यस्याविर्भावः भारतदेशे वैदिककाले एव अभवत्।

**व्याकरणम्**

अस्य व्याकरणशास्त्रस्य "शब्दानुशासनम्" इत्यपरं नाम चास्ति । व्याक्रियन्ते शब्दाः अनेन इति करणव्युत्पत्त्या असाधुशब्देभ्यो पृथक्कृत्य साधुशब्दज्ञापनमेव क्रियते व्याकरणेन । व्याकरणं वेदपुरुषस्य मुखम् इति सुविदितमेव ।अपि च वेदस्य षडङ्गान्युपकारकत्वेन वर्तन्ते इति सुप्रसिद्धमेव । पाणिनिना निजप्रणीतायां शिक्षायाम् अभाणि –

छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठयते
ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते ।
शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्
तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते ।।[15]

संस्कृतव्याकरणेषु पाणिनीयं व्याकरणं सर्ववेदपारिषदम् । अत्र वैदिकानां लौकिकानां शब्दानाम् अनुशासनं सुदृढैर्नियमैः निष्पन्नमस्ति । यद्यपि व्याकरणात्पूर्वमपि पदविभागो कृतः तथापि पदानां सम्यक्तया विवेचनं व्याकरणे निष्पन्नम् । अत एव व्याकरणं पदशास्त्रमपि कथ्यते । संस्कृतभाषायाः व्याकरणस्य अतीव महत्त्वपूर्णः ग्रन्थः पाणिनिकृत् अष्टाध्यायी इति । पाणिनिना अष्टसु अध्यायेषु प्रायेण उपचतुस्सहस्रसूत्रेषु संस्कृतभाषायाः सम्पूर्णं व्याकरणं सङ्क्षिप्तं सुव्यवस्थितं च रूपं उपनिबद्धवान् । पाणिनिना धातूनां प्रत्ययानां च आधारेण नूतनपदानि निर्मितानि। सः दर्शयति किम् विविधानां प्रत्ययानां संयोगेन केन प्रकारेण नवपदानि निर्मातुं शक्यते। तेन वर्णानां ध्वन्याः संयोगस्य नियमाः निर्मिताः। एते नियमाःदर्शयन्ति किम् द्वयोः ध्वन्योः संयोगः केन प्रकारेण भवति, तस्य च कः प्रभावः अस्ति। पाणिनिना क्रियाभिः सम्बद्धः कारकसिद्धान्तः प्रतिपादितः। कारकानि (विभक्तयः) क्रियाभिः सह यः सम्बद्धः अस्ति, सः भाषायाः संरचनां च अर्थं च निश्चितं करोति। पाणिनिनः "अष्टाध्यायी" सूक्ष्मसिद्धान्तेषु आधारितः अस्ति, अतः एषा अतीव महत्त्वपूर्णा अस्ति। एषा न केवल संस्कृतभाषायाः अपि तु अन्येषु भाषाविज्ञानेषु अपि प्रमुखमाधारं निर्मितवती । आचार्यः पाणिनिः एकं विशुद्धं भाषाशास्त्रं प्रस्तौति ।

**धर्मश्रीः इत्युपन्यासस्य परिचयः**

धर्मश्रीः इत्युपन्यासः जनार्दनहेगडेमहोदयेन संस्कृतभाषायाम् अनूदितः अस्ति। अनुवादक्षेत्रे केन्द्रीयसाहित्याकादमीप्रशस्तिं प्राप्तवती कृतिरियम् । मूलतः एषा कथा कन्नडसाहित्यक्षेत्रे लब्धप्रतिष्ठेण एस् एल् भैरप्पावर्येण कन्नडभाषायां लिखिता अस्ति। न केवलं कन्नडक्षेत्रे अपि तु अन्यभाषाक्षेत्रेष्वपि तदीयं नाम सुप्रसिद्धम् अस्ति। यतः तस्य बहवः कृतयः विविधभाषाभिः अनूद्य प्रकाशिताः सन्ति। जनार्दनमहोदयः संस्कृतभाषायां अस्य ग्रन्थस्य अनुवादं कृत्वा संस्कृतं गद्यं साहित्यम् उपकृतवान् । ' सामान्याः संस्कृतज्ञाः अपि एतस्याः पठने प्रवृत्ताः भवेयुः' इत्येषा

स्पष्टावगतिः अनुवादकस्य प्रेरणा इति ‘अनुवादकवचनम्’ ग्रन्थादौ वर्णितः। यद्यपि संस्कृतसाहित्यक्षेत्रं सुसमृद्धमस्ति तथापि आधुनिककाले सर्वभाषासु अपि दृश्यमानः सरलगद्यमयग्रन्थाः अत्र स्वल्पाः एव सन्ति । सरलशैल्यां लिखितः अयं ग्रन्थः संस्कृतभाषाविकासे सहायकः अस्ति । अस्मिन् उपन्यासे अनुवादकस्य शैली, संस्कृतभाषाविज्ञानदृशा अथवा संस्कृतव्याकरणानुसारम् अवलोक्यते विवेच्यते च । धर्मश्रीः इत्युपन्यासस्य प्रथमस्तबकस्य भाषावैज्ञानिकमध्ययनम् अधुना अत्र विधीयते। तत्र तिङन्तपदानि सर्वविधभावान् अभिव्यक्तुं कियन्ति समर्थानि, पाणिनिव्याकरणनियमान् पालयति, तथा वाक्यशैली कीदृशी इति अस्मिन् शोधपत्रे उपन्यासस्थानां वाक्यानाम् उदाहरणपूर्वकं च एतदत्र विशदीक्रियते ।

**धर्मश्रीः इत्युपन्यासस्य वाक्यरचनाव्यवस्था**

**वाक्येषु लकारप्रयोगः**

वाक्ये क्रियापदमेव प्रधानम् । तेनैव वाक्यस्य अर्थः परिसमाप्तो भवति । अतः क्रियापदरहितं वाक्यं निरर्थकमेव । एवं सति तिङन्तस्य प्रयोगे प्रमुखं स्थानं भजति इत्यत्र नास्ति संशयः। तथाभूतानि तिङन्तपदानि प्रायेण लोकव्यवहारे कालभेदेन, विध्यर्थे, आशीरर्थे, क्रियातिपत्त्यर्थे च दृश्यते । एतषु अर्थेषु तिङ्प्रत्ययानाम् अन्वाख्यानलाघवमुद्दिश्य स्थानित्वेन लकाराः विधीयन्ते । एवञ्च ते लकाराः च लट्, लिट्, लुट्, लृट्, लोट्, लङ्, विधिलिङ्, आशीर्लिङ्, लुङ्, लृङ् इति संख्यया दश । यद्यपि लेट् इति एकादशः लकारोपि कश्चन वेदे प्रसिद्धः तथापि सः लकारः अस्माकं प्रकृतविषयान्तर्भूतः न । तत्र वर्तमानकालिकक्रियायाः बोधः लट्लकारेण[16] भवति। अनद्यतने भूते विवक्षिते लङ्[17]। परोक्षभूतविवक्षायां लिट्[18] । भूतसामान्ये लुङ्[19] लकारः प्रयुज्यते । भविष्यन्मात्रे लृट्लकारः[20] भवति । अनद्यतने भविष्यदर्थे लुट्[21] लकारस्य प्रयोगः भवति । क्रियातिपत्तौ भविष्यदर्थे लृङ्लकारस्य[22] विधानमस्ति । विधिलिङाद्यर्थे सूत्रेण लोट्लकारः[23] भवति । विध्यादि इत्यत्र आदिशब्देन विधिनिमन्त्रणामन्तरणाधीष्टसंप्रश्नप्रार्थनानाम् अर्थानां ग्रहणं भवति । अत्र अनुमतिनिमन्त्रणामन्त्रणानुरोधजिज्ञासाप्रार्थनेषु अर्थेषु लोट्लकारस्य प्रयोगः भवति । अनुमतिं विहाय पूर्वोक्तेषु अर्थेषु तथा विधिसामर्थ्ययोः बोधनाय विधिलिङ्लकारस्य[24] तथा आशीर्वादार्थे आशीर्लिङ्लकारस्य[25] प्रयोगः भवति ।

**भूतकालिकक्रियाबोधनव्यवस्था**

भूतकालिकक्रियाबोधनाय त्रयः लकाराः प्रसिद्धाः सन्ति । ते च लिट्, लङ्, लुङ् इति। परोक्षे लिट् इति सूत्रेण परोक्षभूतकालिकक्रियाबोधनाय लिट् लकारः विधीयते । अनद्यतने लङ् इति सूत्रेण लङ् लकारः विधीयते । भूते इति सूत्रेण भूतसामान्ये लुङ् लकारः विधीयते ।

**लिट्लङ्लुङां तिरस्कारः**

अत्र अनुवादकस्य वाक्यशैली कीदृशी अस्ति इति वयम् अत्र प्रतिपादयामः। अस्मिन् उपन्यासे प्रथमे अध्याये वाक्यस्य स्वरूपं, वाक्यविन्यासः कथमस्तीति च वयमधुना पश्यामः। अस्मिन् प्रथमे अध्याये आहत्य पञ्चाशदुत्तरैकशतं वाक्यानि वर्तन्ते । वाक्येषु बहुत्र भूतकालिकक्रियाप्रयोगः दृश्यते । भूतकालिकक्रियाबोधनाय त्रयः लकाराः प्रसिद्धाः। सामान्यभूतकालिकक्रियाबोधनाय लुङ्, अनद्यतन-भूतकालिकक्रियाबोधनाय लङ्, परोक्षभूतकालिकक्रियाबोधनाय लिट् इति पाणिनिना विहिताः लकाराः । तथापि लट् स्मे[26] इति सूत्रं स्मप्रयोगे सति भूतकालिकक्रयाबोधनाय लिट् लकारो विधीयते । अत्र अनुवादकः प्रायेण बाहुल्येन भूतकालिकक्रियाबोधनाय लिट् लङ् लुङ् इति लकारत्रयमपि वर्जयित्वा स्मयुक्तलट्लकार प्रयोगमेव करोतीति स्पष्टमवबुध्यते । यदि क्वचित् लङ्लकारः दृश्यते चेदपि केवलं अस्धातोः भूधातोरेव लङ्लकारः दृश्यते ।

प्रथमं वाक्यं यदा स्वीकुर्मः यदा अहं दशवर्षीयः आसं ग्रामस्य पूर्वस्यां दिशि कासारस्य श्वेतवर्णीय जले अहं यत् तरामि स्म तदा इदानीमपि मनसि स्फुटमस्ति इत्यस्मिन्वाक्ये आसम् इति अस्धातोः लङ्लकारः प्रयुक्तः । परन्तु तत्रैव भूतकालिकतरणक्रियाबोधनाय तरामि स्म इति स्मयुक्तस्य लङ्लकारस्य प्रयोगं करोति । एवमेव द्वितीये वाक्येऽपि ग्रामबालानां गणं विरच्य अहं कासारं गच्छामि स्म इत्येवं प्रयुङ्क्ते। इयं शैली प्रायेण बहुत्र लक्ष्यते एव ।

**वाक्येषु पदविन्यासशैली**

**वाक्येषु पदविन्यासक्रमः**

यद्यपि संस्कृतभाषायां वाक्येषु पदविन्यासक्रमः निश्चितः न । आङ्ग्लादिभाषावत् वाक्येषु पदानां क्रमपरिवर्तनेपि अर्थपरिवर्तनं न भवति संस्कृतभाषायाम् । अतः वाक्येषु पदविन्यासक्रमस्य न अस्यां भाषायां प्रमुखं स्थानं नास्ति इति कथने न कश्चन दोषः । अत एव शास्त्रकृद्भिः पदोपादानक्रमम् अधिकृत्य न नियमाः कृताः । यद्यपि वाक्येषु पदविन्यासक्रमस्य न अस्यां भाषायां प्रमुखं स्थानं तथापि लोकबोधमुद्दिश्य कश्चन क्रमः लोके दृश्यते एव । तदाधारेण अत्र चर्चा विधीयते । अत्र वाक्येषु पदानां क्रमः प्रायेण कर्ता-कर्म-क्रियापदम् इति इत्थं दृग्गोचरो भवति । परम् अत्र केषुचन् वाक्येषु कर्ता क्रियापदानन्तरमपि अन्ते प्रयुक्तं दृश्यते । पिशाचग्रस्ता इव जाता आसीत् सा । औरसाय भवते अपि स्तन्यम् अदत्त्वा मह्यं दत्तवती आसीत् सा । व्यवहारे सर्वथा अदक्षः आसीत् सः, तावदेव न, कदाचित् मातरं विना कारणम् अवाच्यैः शब्दैः भृशं निन्दति स्म सः ।मां दासं मन्यते स्म सा । स्वनिमित्तं कृतं पाकं मह्यं न परिवेषयति स्म सा ।देवालयस्य गर्भगृहे घोरः सर्पः अस्ति इति वार्ता प्रसारितवान् आसीत् सः । एवञ्च एतेषु वाक्येषु अर्थगौरवाय काव्यसौन्दर्याय च अनुवादकः पदक्रमं परिवर्तयति इति अनुमीयते । कुत्रचित् क्रियारहितवाक्यानि अपि दृश्यन्ते। देवता खलु सा । एकस्य गणस्य सेनाधिपतिः अहम् एव ।अवशिष्टः एकमात्रपुत्रः अहम् । नञ्जुण्डः एव अस्माकं पक्षस्य राजा । आपणिकस्य चेन्नप्पश्रेष्ठिनः पुत्रः गुरुवः एव मन्त्री ।

अस्मिन् प्रथमे अध्याये प्रायेण कर्तरि प्रयोगवाक्यानि एव बाहुलेन दृश्यन्ते । विशिष्य तत्र वक्तव्यं चेत्, प्रायेण सर्वाणि वाक्यानि कर्तृवाच्यप्रयोगवाक्यानि एव । अहं कासारं गच्छामि स्म । वृषभशिलायाः समीपं एकाकितया तरन् गच्छामि स्म । कस्यापि तावद् दूरं तरणे धैर्यं न आसीत् । अहं उन्नतः अपि आसम् । सामान्यवर्णः आसीत् मम । अहं ग्रामे अटामि स्म । गणद्वयमासीत् । इत्येवं प्रतिवाक्यं यदा पश्यामः कर्तृवाच्यप्रयोगाः एव दृश्यन्ते । कर्मणि प्रयोगाः विरलाः वर्तन्ते । चतुर्विंशे वाक्ये दशमे एव वयसि सेनाधिपत्यं प्राप्यं मया विराजमानेन मया वृषभशकटः आरोढव्यः अभवत् । रात्रौ अंधकारप्रसारानन्तरं मातुलस्य ग्रामः प्राप्तः मया इति पंचविंशे वाक्ये ततः परं पञ्चसप्ततितमे वाक्ये, ततः परं एकोननवतितमे वाक्ये यद्यपि तत् संपूर्णं वाक्यं कर्तरि प्रयोगे वर्तते तदेकदेशः कर्मणि प्रयोगे दृश्यते । पुनः सप्तनवतितमे वाक्ये मया गृहस्य पृष्ठभागे स्थितायां वाटिकायां भोजनं करणीयं भवति स्म इति इदमपि वाक्यं तादृशमेव । मया सह संभाषणं पंचविंशत्युत्तरशते वाक्ये कदाचित् मया अपि साहाय्यं क्रियते स्म इत्येवम् आहत्य पंचसु वाक्येषु एव कर्मणि प्रयोगः दृश्यते । तत्रापि वाक्यद्वये कर्मणि प्रयोगौ स्तः । अन्यत्र वाक्ये कर्मणि प्रयोगः इतिशब्दगठितः वर्तते इति अपि अत्र अस्माभिः विश्लेषणं कर्तुं शक्यते । अतः साक्षात् अत्र कर्मणि प्रयोगम् अपि वर्जयति अनुवादकः ।

**वाक्यरचनास्वरूपम्**

पुरातनगद्यसाहित्ये दृश्यमानं क्लिष्टं, समासबहुलं वाक्यरूपम् इह न दृश्यते। अत्र विशेषतः सरलवाक्यानि प्रयुक्तानि सन्ति । ग्रामबालानां गणं विरचय्य अहं कासारं गच्छामि स्म । मध्येकासारं स्थितायाः वृषभशिलायाः समीपम् एकाकितया तरन् गच्छामि स्म । मम स्नेहितेषु कस्यापि तावदूरं तरणे धैर्यं न आसीत् ।दशमे एव वयसि मम शरीरं सुदृढम् आसीत् । अहम् उन्नतः अपि आसम् । सामान्यः वर्णः आसीत् मम। घटनानां भावानां च वर्णने दीर्घवाक्यानि दृश्यन्ते। प्रथमे वाक्ये बाल्ये, यदा अहं दशवर्षीयः आसं तदा, अस्माकं ग्रामस्य पूर्वस्यां दिशि स्थितस्य कासारस्य श्वेतवर्णीये जले अहं यत् तरामि स्म तत् इदानीम् अपि मम मनसि स्फुटम् अस्ति । अष्टमे वाक्ये आरक्षकः इव काखिवर्णीयम् अर्धोरुकं धृत्वा रथयात्रावसरे क्रीतं वस्त्रमयं कटिपट्टं च धृत्वा कदलीत्वचा निर्मितां पादरक्षां च परिधाय हस्तेन वेणुनिर्मितं खड्गं गृहीत्वा अहं ग्रामे अटामि स्म ।

**वाक्येषु पदसंस्कारपक्षः**

व्याकरणशास्त्रे पदानाम् अन्वाख्यानं त्रिषु स्तरेषु क्रियते । प्रत्ययनिष्पदानक्रमे, पदस्तरे, वाक्यस्तरे च । तदेव यथाक्रमं क्रमिकान्वाख्यानपक्षः, पदान्वाख्यानपक्षः, वाक्यान्वाख्यानपक्षः इति कथ्यन्ते । प्रकृतेः परत्र प्रत्यये कृते तत्क्रमेण अन्वाख्यानविधानं क्रमिकान्वाख्यानपक्षः इति अभिधीयते । एकं सम्पूर्णं पदम्

अन्वाख्यानविषयो यत्र भवति सः भवति पदान्वाख्यानपक्षः । सम्पूर्णं वाक्यमेव यत्र अन्वाख्यानविषयो भवति सः भवति वाक्यान्वाख्यानपक्षः इत्युच्यते । पदान्वाख्यानपक्षे आदृते वा, वाक्यान्वाख्यानपक्षे आदृते वा यद्यपि वाक्यस्य अर्थे परिवर्तनं न भवति चेदपि, वाक्यस्य स्वरूपे परिवर्तनं भवति । तदत्र धर्मश्रीः उपन्यासस्य प्रथमस्तबकस्य वाक्यसन्दर्भे पदसंस्कारपक्षः एव दरीदृश्यते इति वाक्यानि उदाहृत्य प्रतिपादयामः।

**वाक्येषु कृतसन्धिनिर्देशः**

संस्कृतवाङ्मये वेदवेदाङ्गरामायणमहाभारतशास्त्रकाव्यादिषु ग्रन्थेषु यदि रचयिता वाक्येषु सन्धिं कृत्वा एव निर्दिशति । एतेषु ग्रन्थेषु पद्योपनिबद्धेषु छन्दोनियमपरिपालनाय अपि विरचयित्रा सन्धिः क्रियन्ते एव । यतिनियमपरिपालनाय सन्ध्यभावोपि दृश्यते एव । अस्त्युत्तरस्यां, गमिष्याम्युपहास्यताम् इत्यादिषु पद्येषु कृतसन्धिनिर्देशः दृश्यते ।

**वाक्येषु सन्ध्यभावः**

किञ्च प्रायेण बहुत्र वाक्येषु सन्धिः न दृश्यते, समासेषु सन्धिः दृश्यते तत्र संहितायाः नित्यत्वबोधनात् शास्त्रकृद्भिः । प्रथमे वाक्ये एव यदा अहम् दशवर्षीयः इत्यत्र सवर्णदीर्घसन्धिः न कृतः। ततः परं बहुत्र अतो रोरप्लुतादप्लुते[27] एवं हशि च[28] इति सूत्रांभ्यां विधियमानम् उत्वं वा एवं पूर्वरुपं वा, ततः परं भोभगोअघोअपूर्वस्योशि[29] इति सूत्रेण यकारादेशश्च लोपशाकल्यस्य[30] इति यलोपश्च एतेषु वाक्येषु कुत्रापि न दृश्यते इति परिलक्ष्यते । आरक्षकः इव इति अष्टमे वाक्ये विसर्गं प्रयुङ्क्ते । तत्र आरक्षक इव इति सन्धिं कृत्वा न निर्दिशति । एकादशे वाक्ये उभयोः अपि इत्यत्र उभयोरपि इति नोक्तम् । अत्र सप्तमे वाक्ये सामान्यः वर्णः आसीत मम इत्यत्र सामान्यो वर्ण आसीत् मम इत्यत्र द्रष्अटुं शक्यते यत् हशि च इति उत्वं, यत्वं, यलोपश्च न कृतः दृश्यते । यरोनुनासिकेनुनासिको वा[31] इति सूत्रेण विधीयमानः अनुनासिकादेशस्य च अवकाशः अस्ति चेदपि अनुनासिकादेशः वाक्येषु न दृश्यते । एकोनविंशे वाक्ये, अवशिष्टः अहं एकमात्रः पुत्रः अहम् इत्यत्रापि सन्धेः पूर्णरूपेण अवकाशः अस्ति चेदपि, सम्पूर्णे वाक्ये अवशिष्ट एकमात्रः पुत्रोहम् इति अत्र यत्वं, यलोपः, उत्वं, पूर्वरूपं च न कृतवान् । विंशे वाक्ये त्रिवर्षीया भगिन्यपि इति नोक्तवान् । द्वाविंशे वाक्ये, यदि अहं ग्रामे एव वसेयं इत्यस्य स्थाने यद्यहम् इति अत्र सन्धिः न कृतः। किञ्च अतः एव, इतः एव अत्र वाक्येषु दृश्यते । त्रयोविंशे वाक्ये अतः एव इति हि दृश्यते, न तु अत एव इति, रुत्वस्य यत्वं यलोपश्च अत्र न कृतः । यः अहम् इत्यस्य स्थाने योहम् इति सन्धिं न कृतवान्, षड्विंशे वाक्ये सः वदति इत्यत्र, पंचत्रिंशे वाक्ये सः वदति अत्र सो वदति इति उत्वादेशः न दृश्यते । प्रायेण उत्वसन्धिर्वा यत्वसन्धिर्वा यलोपसन्धिर्वा नैव दृश्यते अत्र । एतेन वयमेवं निश्चिनुमः यत् - पदसंस्काररपक्षम् अवलम्ब्यैव अत्र वाक्यानि अनुवादकेन अनूदितानि सन्ति ।

**समासस्थलेषु कृतसन्धिनिर्देशः**

क्वचित् समासेषु अत्र सन्धिः दृश्यते, यथा अत्र अष्टमे वाक्ये आरक्षकः इव काखिवर्णीयम् अर्धोरुकम् इत्यत्र सन्धिः दृश्यते, तत्रैव यात्रावसरे इत्यत्र सन्धिःदृश्यते, चतुर्दशे वाक्ये सेनाधिपतेः ममैव अधीनाः भवन्ति स्म, इत्यत्र सेनाधिपतेः इत्यस्मिन् पदे सन्धिः दृश्यते, ममैव अधीनाः इत्यत्र एव अधीनाः इत्यत्र सन्धिः न कृतः । क्वचित् सन्धिः विरलेषु शब्देशु दृश्यते - षोडशे वाक्ये ममैव इत्यत्र सन्धिम् अत्र द्रष्टुं शक्यते । अपि च षोडशे वाक्ये, धृष्टबालाः मातुः प्रियाः भवन्ति इति श्रूयते, इत्यत्र भवन्ति इति पदयोः सवर्णदीर्घः न कृतः, एवं एतेषां वाक्यानां सम्यक् पर्यलोचनेन स्पष्टमवबुध्यते, वाक्येषु सन्धिः नास्ति इति । तस्य कारणं तत्र इदमेव स्यात् - यद् अत्र पदसंस्कारपक्षः एव आश्रितः । क्वचित् वाक्ये, क्वचित् पदे समासे सन्धिः दृश्यते, विशिष्य तत्र समस्तपदे सन्धिः अस्ति, यत्र अवकाशो वर्तते, इत्थम् अत्र वयम् एतेषु वाक्येषु समतां विषमतां च दृष्टुं शक्नुमः।

क्वचित् वाक्ये समासाभावेपि सन्धिः दृश्यते, यत्र सः भावः पूर्णतां गच्छति, भावस्य पूरणतया प्रकटनार्थमेव सन्धिः कृतः, यत्र सन्धिं विना सः भावः न लक्षितो भवति, यथा वा सप्ताशीति वाक्ये, अये इत्येव सर्वदा संबोधनम् तस्याः इति वाक्ये इत्येव इत्यत्र सन्धिः दृश्यते, अहम् सः भावः, पूर्णवाक्यं पश्यामः चेत् माम् सा सत्या इति, सत्यानारायण इति वा, न आह्वयति स्म कदापि, अये इत्येव सर्वदा संबोधनम् तस्याः, इति अत्र इत्येव इति कृतसन्धिनिर्देशेनैव संबोधनकरणशैल्याः दृढेण बोधनभावः प्रकटीक्रियते । विना सन्धिं स संबोधनकरणशैल्याः भावः स्फुटं न प्रतीयते । एवमेव तस्मिन्नेव वाक्ये, न आह्वयति स्म कदापि, इत्यत्र कदापि इत्यस्मिन् पदे सन्धिबलादेव सर्वदा अर्थात् सर्वेषु अपि कालेषु तथैव संबोधनं क्रियते इति भावः प्रतीयते । एषः भावः सन्धिबलादेव लभ्यते । कदा अपि इति व्यस्ते सन्धिरहितप्रयोगे तादृशः भावः नैव गम्यते । एवञ्च भावविशेषसंप्रेषणाय तत्र सन्धिः अपेक्षते एव । एवं क्वचित् सन्धिः अस्ति । तदपि पाठकेषु तादृशभावसंप्रेषणायैव सः सन्धिः इति अस्माभिः अत्र ऊह्यते ।

**वाक्येषु धातुविचारः**

**गणाधारितधातुप्रयोगः**

संस्कृतभाषायां धातवः दशसु गणेषु विभक्ताः सन्ति । ध्रमश्रीः इत्युपन्यासे प्रथमस्तबके अनुवादकः भ्वादिगणस्य धातूनां प्रयोगम् अधिकतया कृतवान् । भू, तृ, गम्लृ, अट्, षह्, वद्, णिदि, गै, वस्, डु दाञ्, खादृ, ष्ठा, पठ्, दृशिर्, स्मृ, णीञ्, पठ्, चल, स्नु, ईक्ष, ह्वेञ्, वस्, अदादिगणस्य रूदिर्, असु, शासु, जुहोत्यादिगणस्य डु दाञ्, तनादिगणस्य डु कृञ्, क्र्यादिगणस्य ज्ञा, दिवादिगणस्य मन्, स्वादिगणस्य शक्लृ, आप्लृ चुरादिगणस्य वद्, चिति, तड, धातूनां तिङन्तपदानां प्रयोगः दृश्यते ।

**उपसर्गयुक्तधातुप्रयोगः**

संस्कृतभाषायां पदानां चतुर्धा विभागः कृतः। ते च नामाख्यातोपसर्गनिपाताश्च सन्ति । उपसर्गाः नामाख्याताभ्यां सह क्रियायोगेन उपयुज्यन्ते । निरुक्तकारानुसारं उपसर्गाणां संख्या विंशतिः अस्ति । उपसर्गकारणात् मूलधातोः अर्थे कदाचित् परिवर्तनं भवति, कदाचित् च उपसर्गः धातोः अर्थस्य पोषणम् अपि करोति । "उपसर्गेण धात्वर्थो बलादन्यत्र नीयते, प्रहाराहार-संहार-विहार-परिहारवत्"[32] ॥ इति इगम्लृ धातोः आङ्, प्रति उपसर्गाभ्यां सह प्रयोगः कृतः प्रतिगच्छति । अत्र प्रति उपसर्गवशात् अभिमुखगमनरूपार्थ बोध्यते । तत्रैव प्रत्यागच्छति इत्यत्र प्रति आङ् इति उपसर्गबलात् प्रतिनिवर्तनं बोध्यते । एवमेव अपेक्षते स्म इत्यत्र अप उपसर्गबलात् ईक्ष् धातुः दर्शनभिन्नवाञ्छारूपार्थं बोधयति । निर्गच्छति स्म, प्रचलति स्म, प्रदर्शयति स्म, उत्सहते स्म, आह्वयति स्म, अवशिष्यते, आनयति, अनुसरेयुः एवमुपन्यासे स्मयुक्ताः स्मरहिताः उपसर्गयुक्तधातुप्रयोगाः दृश्यन्ते । प्रदर्शयति स्म इत्यत्र प्र इति उपसर्गबालात् धातोः अर्थे परिवर्तनं न प्रतीयते । दर्शयति प्रदर्शयति अनयोः अर्थे न कश्चन भेदः इति कारणादत्र प्र उपसर्गः निरर्थकः इति वक्तुं शक्यते ।

**निष्कर्ष**

एवं वयं वक्तुं शक्नुमः यत् जनार्दनहेगडेमहोदयस्य वाक्यशैली स्पष्टा, भावबोधनसामर्थ्यसमृद्धा व्याकरणसम्मता च दृश्यते । तेन अनूदिते धर्मश्रीः इति उपन्यासे संस्कृतभाषायाः पारम्परिकसौन्दर्यम् आधुनिकानुभूत्या सह यथोचितः समन्वयः कृतो दृश्यते । अत्र संवादाः स्वभाविकरूपेण निरूपिताः सन्ति । पात्राणां परस्परं सम्प्रेषणं लघुवाक्यैः कृतं येन पाठकस्य रूचिः स्थिरा भवेत् । अल्पव्याकरणज्ञानवातमपि बोधः यथा स्यात् तथा अनुवादकस्य वाक्यपदप्रयोगशैली अत्र वर्तते इति कथयामः चेत् न तत् अतिशोयक्तिपर्णम् ।

**सन्दर्भसूची**

1. काव्यादर्शः 1.4
2. काव्यादर्शः 1.3
3. महाभाष्यम् 1-3-48
4. ऋग्वेदः.10.71, 10.125 सूक्त
5. ऋग्वेदप्रतिशाख्यम् 1.23
6. ऋग्वेदः.1.164.45
7. ऋग्वेदः.8.100.11
8. ऋग्वेदः.10.71.4
9. अथर्ववेदः 1.1.1
10. महाभाष्ये प्रथमाह्निकम्
11. ऋग्वेदादिभाष्यभूमिका पृ. 49

12. पाणिनीयशिक्षा52
13. ऋग्वेदः1.1.2
14. ऋग्वेदः 1.1.2
15. पाणिनीयशिक्षा 41, 42
16. वर्तमाने लट् (3.2.123) वर्तमानक्रियावृत्तेर्धातोर्लट् स्यात्।
17. अनद्यतने लङ् (3/2/111) अनद्यतनभूतार्थवृत्तेर्धातोर्लङ् स्यात्।
18. परोक्षे लिट् ( 3/2/125) भूतानद्यतनपरोक्षार्थवृत्तेर्धातोर्लिट् स्यात्।
19. लुङ्(3/2/110) भूतार्थे धातोर्लुङ् स्यात्।
20. लृट्शेषे च (3/3/13) भविष्यदर्थाद् धातोर्लट्, क्रियार्थायां क्रियायां सत्याम्, असत्याम्।
21. अनद्यतने लुट् (3/3/15) भविष्यत्यनद्यतनेऽर्थे धातोलुट् अष्टाध्यायी।
22. लिङ्निमित्ते लृङ्क्रियाऽतिपत्तौ (3/3/3) हेतुहेतुमद्भावादिलिङ्निमित्ते, तत्र भविष्यदर्थे लृङ् स्यात् क्रियाया अनिष्पत्तौ गम्यमानायाम्।
23. लोट् च (3/3/162) विध्याद्यर्थेषु धातोर्लट्।
24. विधिनिमन्त्रणाऽऽमन्त्रणाऽधीष्ट-संप्रश्न-प्रार्थनेषु लिङ् (3/3/131) एष्वर्थेषु धातोर्लिङ्।
25. आशिषि लिङ्लोटौ (3/3/173) आशिष्यपि लिङ्लोटौ स्तः।
26. लट् स्मे (3/2/118)।
27. अतोरोरप्लुतादप्लुते (6/1/113) अप्लुतादतः परस्य रोरु स्यादप्लुतेऽति।
28. हशि च (6/1/114)
29. भोभगोअघोअपूर्वस्य योऽशि (8/3/17) एतत् पूर्वस्य रोर्यादेशोऽशि।
30. लोपः शाकल्यस्य (8/3/ 19 ) अवर्णपूर्वयोः पदान्तयोर्यवयोरलोपो वाऽशि परे।
31. यरोऽनुनासिकेऽनुनासिको वा (8/4/45) यरः पदान्तस्यानुनासिके परेऽनुनासिको वा स्यात्।
32. वैयाकरणसिद्धान्तकौमुदी, 2232 सूत्रस्यान्ते।
33. धर्मश्रीः उपन्यासः, संस्कृतानुवादः-जनार्दन हेगडे, प्रकाशनम् संस्कतभारती देहली।
34. भाषाविज्ञानम्, डॉ. कर्णसिंह, साहित्य भण्डार सुभाष बाजार, मेरठ।
35. अष्टाध्यायी- भाष्यप्रथमावृतिः भाग १-४ हिन्दी व्याख्याकार पं. ब्रह्मदत्त जिज्ञासु एवं सु प्रज्ञाकुमारी, रामलाल कपूर ट्रस्ट प्रकाशन १९६४।
36. वैयाकरणसिद्धान्तकौमुदी भट्टोजिदीक्षित विरचित (बालमनोरमा सहित) सं. गोपालदत्त पाण्डेय, चौखम्बा सुरभारती प्रकाशन, वाराणसी।
37. काशिकावृतिः (न्यासपदमञ्जरीसहिता) भाग १-४ सं डॉ. श्रीनारायणमिश्र रत्ना पब्लिकेशन वाराणसी १९८३।
38. व्याकरणमहाभाष्यम्, पं. मीमांसक युधिष्ठिर, रामलाल कपूर ट्रस्ट बहालगढ सोनीपत हरियाणा।
39. संस्कृत व्याकरण का इतिहास, पं मीमांसक युधिष्ठिर, रामलाल कपूर ट्रस्ट सोनीपत हरियाणा।
40. संस्कृत व्याकरण का उद्भव एवं विकास, वर्मा सत्यकाम, मोतीलाल बनारसी दिल्ली १९९१।
41. संस्कृत वाङ्मय का वृहद इतिहास, उपाध्याय बलदेव, उत्तर प्रदेश संस्कृत संस्थान लखनऊ।
42. पाणिनीय व्याकरण की भूमिका, डॉ.वी कृष्णास्वाणी अय्यंगार, प्रभात प्रकाशन दिल्ली।
43. निरुक्त, आचार्य यास्क, वैदिक मन्त्रालय अजमेर षष्ट संस्करण १९५७।
44. वाक्यपदीयम्, भर्तृहरि चौखम्बा संस्कृत सीरीज वाराणसी १९६१।
45. ध्वन्यालोकः, आनन्दवर्धन चौखम्बा संस्कृत सीरीज वाराणसी, तृतीयसंस्करण १९६४।
46. शब्दविज्ञानं, डॉ. भोलानाथ तिवारी, शब्दप्रकाशन, दिल्ली, प्रथम संस्करण १९८२।
47. वृहद्धातुकुसुमाकरः, संग्रहकारः सम्पादकश्चपं हरेकान्त मिश्रः, चौखम्बा संस्कृत प्रतिष्ठान दिल्ली।